खड्गफलम्। पद्मम्। (यथा, रामायणे। २। ९५। १४।
"सखीवच्च विगाहस्व सीते! मन्दाकिनीं नदीम्।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि!॥")
तीर्थभेद:। (यथा, महाभारते। १। ३६। ३।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे॥"
अस्य अन्यद्विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम्॥) कुष्ठौषधम्। इत्यमर:। ३। ३। १८५॥
(यथास्य पर्य्याय:।
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत्।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगु:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
खड्गकोष:। इत्यमरटीकायां मथुरेश:॥
काण्डम्। द्वीपभेद:। इति मेदिनी। रे, १८७॥
(अस्य विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम्॥)
युद्धम्। इति नानार्थरत्नमाला॥ *॥

पुष्कर:, पुं, (पुष+"पुष: कित्।" उणा० ४। ४। इति करन्। स च कित्।) रोगविशेष:। नागविशेष:। सारसपक्षी। नृपभेद:। स तु नलराजभ्राता। (यथा, महाभारते।३।५९।४।
"स समाविश्य च नलं समीपं पुष्करस्य च।
गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै॥"
अयं हि कलिसाहाय्येन अक्षद्यूते नलं विजित्य निषधाधिपोऽभवत्। एतद्वृत्तान्तं महाभारते वनपर्व्वणि ५९ अध्याये द्रष्टव्यम्॥)
वरुणपुत्त्र:। इति मेदिनी। रे, १८७॥ (वाद्यविशेष:। यथा, मार्कण्डेये। १०६। ६९।
"प्रावाद्यन्त ततस्तत्र वेणुवीणादिदर्दुरा:।
पणवा: पुष्कराश्चैव मृदङ्गा: पटहानका:॥")
पर्व्वतविशेष:। इति शब्दरत्नावली॥ *॥
सप्तद्वीपानां मध्ये द्वीपविशेष:। पुष्करद्वीपवर्णनं यथा,—

सूत उवाच।

"शाकद्वीपस्य विस्ताराद्द्विगुणेन समन्तत:।
क्षीरार्णवं समाश्रित्य द्वीप: पुष्करसंज्ञित:॥
एक एवात्र विप्रेन्द्रा: पर्व्वतो मानसोत्तर:।
योजनानां सहस्राणि चोर्द्ध्वं पञ्चाशदुच्छ्रित:॥
तावदेव च विस्तीर्ण: सर्व्वत्र परिमण्डल:।
स एव द्वीपो यश्चार्द्धमानसोत्तरसंज्ञित:॥
एक एव महासानु: सन्निवेशाद्द्विधाकृत:।
तस्मिन्द्वीपे स्मृतौ तु द्वौ पुण्यौ जनपदौ शुभौ॥
अपरौ मानवस्याथ पर्व्वतस्यानुमण्डलौ।
महावीतं स्मृतं वर्षं धातकीषण्डमेव च॥
स्वादूदकेनोदधिना पुष्कर: परिभावित:।
तस्मिन्द्वीपे महावृक्षो न्यग्रोधोऽमरपूजित:॥
तस्मिन्निवसति ब्रह्मा विश्वात्मा विश्वभावन:।
तत्रैव मुनिशार्दूला: शिवनारायणालयम्॥
वसत्यत्र महादेवो हरार्द्धो हरिरव्यय:।
संपूज्यमानो ब्रह्माद्यै: कुमाराद्यैश्च योगिभि:॥
गन्धर्व्वै: किन्नरैर्यक्षैरीश्वर: कृष्णपिङ्गलै:।
सुस्थास्तत्र प्रजा: सर्व्वा ब्राह्मणा: सदृशत्विष:॥
निरामया विशोकाश्च रागद्वेषविवर्ज्जिता:।
सत्यानृते न तत्रास्तां नोत्तमाधममध्यमा:॥
न वर्णाश्रमधर्म्माश्च न नद्यो न च पर्व्वता:।
परेण पुष्करस्याथ समावृत्य स्थितो महान्॥
स्वादूदक: समुद्रस्तु समन्ताद्द्विजसत्तमा:।
परेण तस्य महती दृश्यते लोकसंस्थिति:॥"
इति कौर्म्मे ४७ अध्याय:॥ *॥
पुष्करद्वीपस्थराजा। तस्य रथ:। यथा,—
"लोकेश्वर: सोऽपि नृभिर्मुनीन्द्रै-
र्देवै: सहेन्द्रैरथ ब्रह्मचारी।
द्वीपे शुभे पुण्यजनैरुपेते
उवास राजा स तु पुष्करस्थ:॥
तेनैव नाम्ना स तु पुष्करोऽपि
सदोच्यते देवगणै: ससिद्धै:।
तेनैव यानेन तथाम्बुजेन
बभूव नाम्ना तमथाह्वयन्ति॥"
इत्यग्निपुराणम्॥ *॥
ब्रह्मकृततीर्थविशेष:। तस्य नामान्तरम्। रूपतीर्थम् २ सुखदर्शनम् ३। तत्र ज्येष्ठपुष्करमध्यमपुष्करकनिष्ठपुष्करनामकास्त्रयो ह्रदा:। तस्य परिमाणं शतयोजनमण्डलम्। इति पद्मपुराणम्॥ *॥ योगविशेषे गङ्गादीनां पुष्करत्वं यथा,—
"मकरस्थो यदा भानुस्तदा देवगुरुर्यदि।
पूर्णिमायां भानुवारे गङ्गा पुष्कर ईरित:॥
गङ्गोत्तर्य्यां प्रयागे च कोटिसूर्य्यग्रहै: सम:।
सिंहस्थे दिनकरे तथा जीवेन संयुते॥
पूर्णिमायां गुरोर्व्वारे गोदावर्य्यान्तु पुष्कर:।
तत्र स्नानञ्च दानञ्च सर्व्वं कोटिगुणं भवेत्॥
मेषसंस्थे दिवानाथे देवानाञ्च पुरोहिते।
सोमवारे सिताष्टम्यां कावेरी पुष्करो मत:॥
कर्कटस्थे दिवानाथे तथा जीवेन्दुवासरे।
अमायां पूर्णिमायां वा कृष्णा पुष्कर उच्यते॥"
इति स्कन्दपुराणे पुष्करखण्डे श्रीशैलमाहात्म्यम्॥
मेघनायकविशेष:। तत्परिज्ञानं यथा,—
"त्रियुते शाकवर्षे तु चतुर्भि: शेषिते क्रमात्।
आवर्त्तं विद्धि सम्वर्त्तं पुष्करं द्रोणमम्बुदम्॥"
इति ज्योतिस्तत्त्वम्॥
तस्य फलम्। यथा,—
"पुष्करे दुष्करं वारि शस्यहीना वसुन्धरा।
विग्रहोपहता लोका: पुष्करे जलदाधिपे॥"
इति ज्योतिषम्॥ *॥
क्रूरवार-भद्रातिथि-समपादनक्षत्र-घटिताशुभजनकयोगविशेष:। यथा,—
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी।
पूर्व्वभाद्रं विशाखा च रविभौमशनैश्चरा:॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
एतेषामेकदा योगे भवतीति त्रिपुष्कर:॥ *॥
जाते तु जारजो योगो मृते भवति पुष्कर:।
त्रिगुणं फलदो वृद्धौ नष्टे हृते मृते तथा॥
प्रथमे मासि वर्षे वा कुटुम्बमपि पीड़येत्।
देवोऽपि यदि वा रक्षेत् तस्य पुत्त्रो न जीवति॥
अतस्तद्दोषशान्त्यर्थं होमयेदयुतं बुध:।
अशक्तश्च सुवर्णादिदानं कुर्य्याद्यथाविधि॥"
समर्थश्चेद् वराहसंहितोक्तं अयुतहोमादिकं कुर्य्यात्। वाक्यं यथा,—
श्रीविष्णुरोम् तत् सदद्यामुके मास्यमुकपक्षेऽमुकतिथौ अमुकगोत्र: श्रीअमुकदेवशर्म्मा अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणस्त्रिपुष्करयोगकालीनमरणजन्यदोषशमनकाम: इदं काञ्चनं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे। ततो दक्षिणां दद्यात्। अन्यत्र पूजाहोमकर्म्मणी करिष्ये। इति विशेष:। एतत् सर्व्वमशौचेऽपि कर्त्तव्यम्। यथा दक्ष:।
"सुस्थकाले त्विदं सर्व्वं सूतकं परिकीर्त्तितम्।
आपद्गतस्य सर्व्वस्य सूतकेऽपि न सूतकम्॥"
इति शुद्धिकारिका॥ *॥
अपि च।
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी।
पूर्व्वभाद्रं विशाखा च षड़ेते वै त्रिपुष्करा:॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
शनिर्भौमो रविश्चैव वाराश्चैते त्रिपुष्करा:॥
एते त्रिपुष्करा ज्ञेयास्तथा द्वादशमासिके।
द्विमासे च तथा प्राप्ते षण्मासे च चतुर्थके॥
षोड़शे मासि संपूर्णे कुटुम्बं पीड़येद्ध्रुवम्।
अन्तेऽप्युपान्ते मध्ये च पुष्करो हन्ति नान्यथा॥
तद्दोषप्रशमार्थन्तु होमयेदयुतं बुध:।
तिलव्रीहियवांश्चैव कृत्वाज्येन समन्तथा॥
क्षीरेणैव तथाचार्य्यो जुहुयाद्भक्तिभावत:।
चरुञ्च श्रपयेत्तत्र प्रान्ते कुर्य्याद्बलिन्तथा॥
वैकङ्कोडुम्बराश्वत्थै: प्रत्येकाष्टोत्तरं शतम्।
एकैकं त्रित्रिसंयुक्तं दर्भेण परिवेष्टितम्॥
यमाय वकङ्कतेन धर्म्मायोडुम्बरेण च।
अश्वत्थेश्चित्रगुप्ताय जुहुयात् क्रमशस्तथा॥
तद्वद् घृततिलांश्चैव तथा समिधमेव च।
एकीकृत्य समं सर्व्वं चरुमाश्रित्य होमयेत्॥
यवव्रीहितिलैर्युक्तं तण्डुलं श्रपयेच्चरुम्।
दधिमध्वाज्यसंयुक्तं होम: सहस्रसंख्यया॥
वैकङ्कोडुम्बराश्वत्थैर्होमयेद्विधिपूर्व्वकम्।
यमं धर्म्मं चित्रगुप्तं पुष्करं पुरुषं तथा॥
तिथिं वारं तथा ऋक्षं पूजयित्वा तु होमयेत्।
पञ्चवर्णेन चूर्णेन कुर्य्याद्धि पद्ममण्डलम्॥
यमं धर्म्मं चित्रगुप्तं स्थापयेत् क्रमशस्तत:।
तिलप्रपूरिते पात्रे लौहे च कृष्णवाससा॥
वेष्टयित्वा यमं तत्र स्थापयेल्लौहनिर्म्मितम्।
घृतप्रपूरिते पात्रे कांस्यपात्रे निरञ्जनम्॥
रौप्याकृतिं शुक्लवस्त्रवेष्टितं तत्र पूजयेत्।
गुड़प्रपूरिते पात्रे ताम्रपात्रे च मन्त्रिणम्॥
स्वर्णाकृतिं रक्तवस्त्रवेष्टितं तत्र पूजयेत्।
क्षीरप्रपूरिते पात्रे प्रस्तरपात्रे च पुष्करम्॥
कृष्णाकृतिं कृष्णवस्त्रवेष्टितं तत्र पूजयेत्।
सुवर्णतुल्यमर्द्धं वा अथवा शक्तिभावत:॥
प्रतिमाश्च समा: सर्व्वा: क्रमात्तत्र नियोजिता:।
व्रीहौ यवे तथा धान्ये क्रमात् पात्रत्रयन्तत:॥